# MT

Seat No. | | | | | | | |

2018 .... .... 1100

**MT - SANSKRIT ENTIRE (SECOND OR THIRD LANGUAGE) - SEMI PRELIM - I**
**PAPER - III**

**Time : 3 Hours** **(Pages 11)** **Marks : 100**

---

## प्रथमः विभागः - सुगमसंस्कृतम् ।

**प्र.१ अ) चित्रं दृष्ट्वा नामानि लिखत । (५ तः ४)** ४

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| १ |  | २ |  | ३ |  | ४ | मरीचिका  | ५ |  |
| | | | | | | | | | |

**प्र.१ आ) सङ्ख्याः अक्षरैः अङ्कैः वा लिखत । (३ तः २)** २

१. ५८ -
२. चतुस्सप्ततिः -
३. १८ -

**प्र.१ इ) स्तम्भमेलनं कुरुत ।** २

| | अ | ब |
|---|---|---|
| १. | सपाद-पञ्चवादनम् | ०८:३५ |
| २. | विंशत्यधिक-पञ्चवादनम् | ०५:१५ |
| ३. | पञ्चविंशत्यधिक-त्रिवादनम् | ०५:२० |
| ४. | पञ्चत्रिंशदधिक-अष्टवादनम् | ०३:२५ |

**प्र.१ ई) वासर - तालिकां पूरयत । (केऽपि २)** २

| ________ बुधवासरः | ← | ________ गुरुवासरः | → | श्वः ________ | → | परश्वः शनिवासरः |
|---|---|---|---|---|---|---|

**प्र.१ उ) उदाहरणद्वयं लिखत । (६ तः ५)** ५

१. दीर्घस्वरौ -
२. ऋकारान्तस्य -
३. कण्ठयौ -
४. नपुंसकलिङ्गस्य -
५. प्रथमगणस्य धातू -
६. दशमगणस्य धातू -

## द्वितीयः विभागः - गद्यम् ।

**प्र.२ अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

| | | |
|---|---|---|
| लीना | - | अहमपि भाषाशास्त्रम् अधीत्य बेङ्गलुरू इत्यत्र सॉफटवेअर-क्षेत्रे भारतीयभाषाविश्लेषिकारूपेण कार्यं करोमि । संस्कृतस्य ज्ञानम् आधुनिकभारतीय-भाषाणां विश्लेषणे अतीव साहाय्यकरं भवति इति मे अनुभवः । |
| तनुजा | - | पार्श्वनिवेदनम् इति मे व्यवसायः । संस्कृतश्लोकादीनां पठनेन शब्दोच्चारणस्य उत्तमः अभ्यासः भवति । तेन अभिनये निवेदने च प्रभावः वर्धते । साम्प्रतं कलाक्षेत्रे कार्यरताः अस्मासु केचन भरतमुनेः नाट्यशास्त्रस्य अध्ययनं कुर्वन्ति । |
| समीरः | - | भोः, भारतीयविद्यायाः नाम भारतीयतत्त्वज्ञान-योगशास्त्र-इतिहास स्थापत्यादिशास्त्राणाम् अध्ययनाय विदेशेष्वपि नैके जनाः उत्सुकाः । तदर्थं काश्चन दूरचित्रवाहिन्यः अपि सन्ति । तत्र संस्कृततज्ज्ञानाम् आवश्यकता वर्तते । मम सुहृद् आशयसम्पादकरूपेण तत्र कार्यरतः । |
| महोदया | - | अस्माभिः संस्कृतस्य अध्ययनं शालायां कृतम् । परं तस्य अनेन प्रकारेण उपयोजनं भवेदिति अस्माभिः नैव चिन्तितम् । |
| महोदयः | - | सत्यमेव । |
| लीना | - | यस्मिन् कस्मिन्नपि क्षेत्रे वयं वृत्त्यर्थं कार्यरताः स्याम, तत्र संस्कृतज्ञानम् अस्मत्कृते विशेषार्हता भवति । |

**१. अवबोधनम् । ( ४ तः ३ )**

**क) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत ।** १

१) अस्माभिः संस्कृतस्य अध्ययनं........... कृतम् । (शालां / शालायां)
२) केचन भरतमुनेः ............ अध्ययनं कुर्वन्ति । (नाट्यशास्त्रस्य / व्याकरणशास्त्रस्य)

**ख) पूर्णवाक्येन उत्तरत ।** १
शब्दोच्चारणस्य अभ्यासः केन भवति ?

**ग) वाक्यं पुनर्लिखित्वा सत्यम् /असत्यम् इति लिखत ।** १
संस्कृतस्य ज्ञानम् आधुनिकभारतीयभाषाणां विश्लेषणे अतीव साहाय्यकरं भवति।

**घ) एषः गद्यांशः कस्मात् पाठात् उद्धृतः ?** १

२. **शब्दज्ञानम् । (३ तः २)**

**क) गद्यांशतः सप्तमी-विभक्त्यन्तपदे चित्वा लिखत ।** १

**ख) मेलनं कुरुत ।** १

| विशेषणम् | विशेष्यम् |
|---|---|
| साहाय्यकरम् | जनाः |
| उत्सुकाः | पार्श्वनिवेदनम् |
| | ज्ञानम् |

**ग) लकारं लिखत ।** १
तेन अभिनये निवेदने च प्रभावः <u>वर्धते</u> ।

३. **पृथक्करणम् ।** २
**जालरेखाचित्रं पूरयत ।**



**प्र.२ आ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

| |
|---|
| प्रथमः प्रसङ्गः । संन्यासार्थम् अनुमतिः प्राप्ता । |
| भारतस्य दक्षिणदिशि केरलप्रदेशे आलुवा नगरस्य समीपं 'कालडि' नाम ग्रामः । सः ग्रामः पूर्णानदीतीरे वर्तते । अत्र जगद्गुरोः शङ्कराचार्यस्य जन्म ख्रिस्ताब्दे अष्टमे शतके अभवत् । तस्य पिता शिवगुरुः माता आर्याम्बा चास्ताम् । बाल्ये एव तस्य पिता शिवगुरुः दिवङ्गतः । तस्माद् मातैव पुत्रस्य पालनम् अकरोत् । पञ्चमे वयसि उपनीतः सः पठनार्थं गुरुमुपागच्छत्। तत्र वेद-वेदाङ्गानि, विविधशास्त्राणि च असाधारणवेगेन बालकोऽयम् अधीतवान् । पठनादिकं समाप्य शङ्करः गृहं प्रत्यागतवान् । गृहं प्राप्य मातृसेवाम् आरभत च । माता आर्याम्बा पुत्रस्य विवाहविषये सदैव चिन्तयति स्म । परन्तु मनसा वचसा कर्मणा च विरक्तः शङ्करः संन्यासार्थम् अनुमतिं प्रार्थयत । शङ्करस्य ऐहिकविषयेषु अरुचिं दृष्ट्वा आर्याम्बा चिन्तामग्ना जाता । |

**१. अवबोधनम् । ( ४ तः ३ )**

**क) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत ।** १

१) ......... वयसि उपनीतः सः पठनार्थं गुरुम् उपागच्छत् । (पञ्चमे / दशमे)

२) पठनादिकं समाप्य शङ्करः ...... प्रत्यागतवान् । (गृहं / नदीं)

**ख) पूर्णवाक्येन उत्तरत ।** १

गुरुमुपगम्य शङ्करः किम् अधीतवान् ?

**ग) वाक्यं पुनर्लिखित्वा सत्यम् /असत्यम् इति लिखत ।** १

शङ्करः अतीव प्रज्ञावान् बालकः ।

**घ) एषः गद्यांशः कस्मात् पाठात् उद्धृतः ?** १

**२. शब्दज्ञानम् । (३ तः २)**

**क) गद्यांशतः द्वे ल्यबन्तअव्यये चित्वा लिखत ।** १

**ख) प्रश्ननिर्माणं कुरुत ।** १

माता आर्याम्बा <u>पुत्रस्य</u> विवाहविषये सदैव चिन्तयति स्म ।

**ग) मेलनं कुरुत ।** १

| विशेषणम् | विशेष्यम् |
|---|---|
| शङ्करः | चिन्तामग्ना |
| आर्याम्बा | दिवङ्गतः |
| | विरक्तः |

३. **पृथक्करणम् ।** २

**स्थानाधारेण शब्दपेटिकां पूरयत ।**

(कालडीग्रामः, केरलप्रदेशः, भारतदेशः, आलुवानगरम्)



**प्र.२ इ) गद्यांशं पठित्वा माध्यमभाषया सरलार्थं लिखत । (२ तः १)** ४

१.

| | | |
|---|---|---|
| (ततः प्रविशति विश्वामित्रः । नदीं प्रणम्य...) | | |
| विश्वामित्रः | - | कथं लङ्घनीयः प्रवाहो नदीनाम्, कथं रक्षितव्यं जनं गोधनं च ।।<br>कथं याचितव्यस्तरणाय मार्गः, कथं प्रार्थनीया शुभेच्छा नदीनाम् ।। |
| नदी (विपाट्) | - | कः खलु एषः मानवः ? अस्मान् किमर्थं वन्दते स्तौति च ? आर्य, किन्नामा भवान्? कस्माद् अस्मान् आह्वयति ? |
| विश्वामित्रः | - | अयि मातः, विश्वामित्रोऽहम् । दूरतः आयातः रथैः शकटैः च । वयं सर्वे परतीरं गन्तुं समुत्सुकाः । |

२.

| | | |
|---|---|---|
| (रङ्गमञ्चे - कीर्तनकारः कीर्तनं करोति, श्रोतृवृन्दः श्रवणे मग्नः ।) | | |
| कीर्तनकारः | - | गङ्गे च यमुने चैव गोदावरि सरस्वति ।<br>नर्मदे सिन्धुकावेरि पृथिव्यां सन्निधिं कुरु ।।<br>ज्येष्ठमासे शुक्लपक्षे दशम्यां तिथौ गङ्गादशहरापर्वप्रारम्भः । अस्मिन् पर्वणि नदीपूजनं कर्तव्यम् । |
| श्रोतृवृन्दः | - | नदीपूजनम् ? किमर्थं नदीपूजनम् ? |
| कीर्तनकारः | - | नदी खलु जीवनदायिनी । अतः अस्मिन्नवसरे कृतज्ञतां प्रदर्शयितुं जनाः जले दीपदानं कुर्वन्ति । द्रोणे दीपं प्रज्वाल्य नदीजले समर्पयन्ति । |

**प्र.२ ई) माध्यमभाषया उत्तरं लिखत । (३ तः २)** ४

१) पशूनां सहभोजनसमये कः हास्यपूर्णः अनवस्थाप्रसङ्गः समुत्पन्नः ?

२) ज्ञानग्रहणविषये शङ्कराचार्याणां किं मतम् ?

३) संस्कृताध्ययनम् अन्यक्षेत्रेषु कथम् उपयुक्तम् ?

## तृतीयः विभागः - पद्यम् ।

**प्र.३ अ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

वृद्धोऽहं त्वं युवा धन्वी सरथः कवची शरी ।
तथाप्यादाय वैदेहीं कुशली न गमिष्यसि ।।
तस्य तीक्ष्णनखाभ्यां तु चरणाभ्यां महाबलः ।
चकार बहुधा गात्रे व्रणान्पतगसत्तमः ।।

**क) पूर्णवाक्येन उत्तरं लिखत ।** १

जटायुः कथं व्रणान् चकार?

**ख) विशेषणानि लिखत ।** १

जटायुः -

**ग) रेखाचित्रं पूरयत।** २




**प्र.३ आ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।**

रे रे चातक सावधानमनसा मित्र क्षणं श्रूयताम्
अम्भोदा बहवोऽपि सन्ति गगने सर्वेऽपि नैतादृशाः ।
केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ।।
वैद्यराज नमस्तुभ्यं यमराजसहोदर ।
यमस्तु हरति प्राणान् त्वं तु प्राणान् धनानि च ।।

**क) पूर्णवाक्येन उत्तरं लिखत ।** १

वैद्यः किं किं हरति ?

**ख) सन्धिविग्रहं कुरुत ।** १

वृष्टिभिरार्द्रयन्ति - ............... + ............... ।

**ग) माध्यमभाषया उत्तरतं लिखत ।** २

'रे रे चातक' इति श्लोकं माध्यमभाषया स्पष्टीकुरुत ।

**प्र.३ इ) पद्ये शुद्धे पूर्णे च लिखत । (क - ख तः १ तथा ग - घ तः १)** ६

१. **क.** भिक्षुः ............... वः।।

**ख.** अयं ...............वा ।।

२. **ग.** राक्षसेभ्यः ............... पण्डितः ।।

**घ.** कं ............... शीतम् ।।

**प्र.३ ई) माध्यमभाषया सरलार्थं लिखत । (४ तः ३)** ६

१. यथैव सकला नद्यः प्रविशन्ति महोदधिम् ।
तथा मानवताधर्मं सर्वे धर्माः समाश्रिताः ।।

२. षड्जमूला यथा सर्वे सङ्गीते विविधाः स्वराः ।
तथा मानवताधर्मं सर्वे धर्माः समाश्रिताः ।।

३. यथा प्रकाशयत्येको भानुर्भुवनमण्डलम् ।
धर्मान् प्रकाशयत्येकस्तथा मानवतागुणः ।।

४. आत्मौपम्यं समाश्रित्य मानवो मानवैः सह ।
यदा व्यवहरेल्लोके तदा मानवता भवेत् ।।

## चतुर्थः विभागः - लेखनकौशलम् ।

**प्र. ४ अ) वाक्यरचनां कुरुत ।**

**क) धातूनाम् उपयोगं कृत्वा वाक्यनिर्माणं कुरुत । (५ तः ३)** ३

१. कुप् →

२. वि + रम् →

३. पत् →

४. कथ् →

५. रक्ष् →

**ख) अमरकोषात् समानार्थकं शब्दं योजयित्वा वाक्यं पुनर्लिखत । (४ तः २)** २

१. आकाशे मेघः गर्जति ।

२. का शीतलवाहिनी गङ्गा ?

३. राजा याचकाय धनं यच्छति ।

४. धेनुः लोकमाता अस्ति ।

**प्र.४ आ) ५ / ७ वाक्यात्मकं निबन्धं अथवा संवादं लिखत । (३ त:१)** ५

(१) मम प्रियं पुस्तकम् (२) भारतीयं प्रसिद्धं स्थलम् (३) मम प्रिया भाषा

**अथवा**

(१) आपणसंवादः (२) रुग्णालयसंवादः (३) दूरवाणीसंवादः

**प्र.४ इ) निर्दिष्टां कृतीं कुरुत ।**

**मञ्जूषातः उचितशब्दान् चित्वा ५-६ वाक्यात्मकं चित्रवर्णनं कुरुत ।** ५

१.




**(मञ्जूषा :** नयति, कर्तयति, खादति, भषति, दोग्धि, धारयति, उड्डयते, चलति, रचयति, पूरयति)

**अथवा**

**प्र.४ इ) संस्कृतानुवादं कुरुत । (८ तः ५)**

१. A girl measures with a scale.
२. Mother rolls the chapati.
३. Lion roars loudly.
४. Please open that door.
५. Children play in the water.
६. Students read a treatise/book.
७. Animals and birds live in the forest.
८. Father returns from the office at 5 o'clock in the evening.

## पञ्चमः विभागः - भाषाभ्यासः ।

**प्र.५ अ) तालिकापूर्तिं कुरुत ।**

**१. नामतालिका । (६ तः ४)** २

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| ............ | शाखिनौ | ............ | प्रथमा |
| रज्जवे | ............ | ............ | चतुर्थी |
| ............ | पितृभ्याम् | ............ | तृतीया |

**२. सर्वनामतालिका । (६ तः ४)** २

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| अस्य | ............ | ............ | षष्ठी |
| ............ | आवाम्-नौ | ............ | द्वितीया |
| ............ | ............ | ताः | प्रथमा |

**३. क्रियापदतालिका । (६ तः ४)** २

| लकाराः | एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|---|
| लङ् | ............ | ............ | अभवन् | प्रथमः पुरुषः |
| लृट् | गमिष्यसि | ............ | ............ | मध्यमः पुरुषः |
| लट् | ............ | पश्यावः | ............ | उत्तमः पुरुषः |

**४. धातुसाधित-विशेषण- तालिका । (६ तः ४)** २

| धातुः | क्त | क्तवतु | कृत्याः | शतृ/शानच् |
|---|---|---|---|---|
| प्रच्छ् - पृच्छ् (६ प.प.) | ............ | पृष्टवान् | ............ | पृच्छन् |
| रम् (१ आ.प.) | रतः | ............ | रन्तव्यः | ............ |
| कृ (८ उ. प.) | ............ | ............ | कार्यः | कुर्वाणः |

**प्र.५ आ) निर्दिष्टाः कृतीः कुरुत । (५ तः ४)**

**१) योग्यपर्यायं चित्वा रिक्तस्थानपूर्तिं कुरुत । (५ तः ३)** ३

१. तेन ............ प्रयोगः कृतः । (त्रिवारम् / त्रीणि)

२. भोजने ............ रसेषु मधुरः रसः मम प्रियः । (षष्ठः / षट्सु)

३. दिनस्य ............ लोकयानम् आगच्छति । (नववारम् / नवदश)

४. भवने मम गृहं ............ तले वर्तते । (सप्तम् / सप्तमे)

५. पौषमासः संवत्सरस्यः ............ मासः । (दशः / दशमः)

**२) समासानां तालिकापूर्तिं कुरुत । (५ तः ३)** ३

| | समस्तपदम् | समासविग्रहः | समासनाम |
|---|---|---|---|
| १. | यथेच्छम् | ............ | अव्ययीभावः समासः |
| २. | शेगावस्थानकम् | शेगाव इति स्थानकम् । | ............ |
| ३. | ............ | दुष्टं बलं यस्य सः । | बहुव्रीहि-समासः |
| ४. | भयाकुला | ............ | तृतीया-तत्पुरुषः समासः |
| ५. | यमराजसहोदरः | ............ | षष्ठी-तत्पुरुषः समासः |

**३) समानार्थकशब्दान् / विरुद्धार्थकशब्दान् लिखत । (५ तः ३)** ३

१. शीघ्रम् - २. नदी -
३. उत्सुकाः × ४. मखः -
५. समाप्य ×

**४) सुचनानुसारं कृतीः कुरुत । (५ तः ३)** ३

क. वैद्यः प्राणान् हरति । (वाक्यं लङ्लकारे परिवर्तयत ।)
ख. अपि भवती संस्कृतं पाठयति ? ('भवती' स्थाने 'त्वं' योजयत ।)
ग. सः महोदयम् उपगम्य वदति । (पूर्वकालवाचकं निष्कासयत ।)
घ. सः पठनार्थं गुरुमुपागच्छत् । (बहुवचनं कुरुत ।)
ङ. त्वत्समीपम् आगमिष्यामि । (लकारं लिखत ।)

**५) वाक्यं शुद्धं कुरुत । (५ तः ३)** ३

१. भवान् किं करोषि ?
२. शूरः रामः गच्छसि ।
३. निर्धनः पुरुषं तु मित्राणि अपि त्यजन्ति ।
४. एकं बालिका पाठं न अस्मरत् ।
५. भारतदेशे विशालाः अरण्यानि सन्ति ।

**षष्ठः विभागः - अपठितम् ।**

**प्र.६ अ) गद्यांशं पठित्वा कृतीः कुरुत । (६ तः ४)**

'शरयू' नद्यास्तीरे अयोध्या नाम नगरी आसीत्। तत्र दशरथो नाम नृपालोऽभवत्। प्रजावत्सलः स रामलक्ष्मणभरतशत्रुघ्नानां पिताऽभवत्। दशरथस्य शान्ता नाम्नी एका दुहितासीत्। अर्थात् सा रामस्य स्वसा। रामस्य भार्या सीता। सा दशरथस्य स्नुषा। शान्ता सीतायाः ननान्दा। ऋषिः ऋष्यशृङ्गः शान्तायाः भर्ता। स दशरथस्य जामाता। तथा रामस्यावुत्तः।

**१) एकवाक्येन उत्तरत ।** १

कः दशरथस्य जामाता ?

**२) प्रातिपदिकं लिखत ।** १

१) ननान्दा - ...............

२) शान्तायाः - ...............

**३) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यम् इति लिखत ।** १

सीता दशरथस्य स्नुषा ।

**४) गद्यांशात् लङ् - क्रियापदानि चित्वा लिखत ।** १

**५) माध्यमभाषया सरलार्थं लिखत ।** १

दशरथस्य शान्ता नाम्नी एका दुहितासीत् ।

**६) गद्यांशात् प्रथमा-विभक्त्यन्तपदानि चित्वा लिखत ।** १

**प्र.६ आ) - १) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

अन्नदानं परं दानं विद्यादानं ततः परम् ।
अन्नेन क्षणिका तृप्तिः यावज्जीवं तु विद्यया ॥

**क) एकवाक्येन उत्तरत । (२ तः १)** १

(१) सर्वश्रेष्ठं दानं किम् ?

(२) अन्नेन किं भवति ?

**ख) समानार्थकशब्दान् लिखत ।** १

परम् - ...............

**प्र.६ आ) - २) जालचित्रं पूरयत ।** २

क्षणिका तृप्तिः — ..........................

श्रेष्ठं दानम् — ..........................

**शुभं भवतु**